# संस्कृतवार्ता:

दिनाङ्क: 07.06.2026 प्रात: - 06:55

## अथ वार्ताः

### प्रधानमन्त्री/आर्थिकपरामर्शपरिषद्

प्रधानमन्त्री नरेन्द्र-मोदी ह्यः आर्थिक-परामर्श-परिषदः सदस्यैः समम् आकारितस्य उपवेशनस्य अध्यक्षताम् अकरोत्। उपवेशने प्रधानमन्त्री परिषत्सदस्याः च वैश्विकानिश्चितता-काले भारतस्य भूयोऽपि आर्थिकवृद्धिं कर्तुं विभिन्नेषु परामर्शोपायेषु चर्चितवन्तौ। जीवनस्तरं व्यापारं च सुगमीकर्तुम् अपि सविस्तरं विचारणा जाता। सदस्यैः भारते विश्वे च पश्चिमैशिया-संघर्षेण उत्पन्न-प्रभावानाम् अपि आकलनं प्रस्तुतम्।

=========================

### जयशंकरः/नेपालविदेशमन्त्री

विदेशमन्त्री डॉ.सुब्रह्मण्यम्-जयशङ्करः उक्तवान् यत् भारतं नेपालं च सुदीर्घ-मुक्त-सीमायां सुरक्षा-व्यवस्थां प्रवर्तयितुं दृढतया सहयोगं कुरुतः, अपि च, उभौ देशौ संकटकाले अपि सर्वदैव परस्परं साहाय्यं कुरुतः। नवदिल्ल्यां नेपालस्य विदेशमन्त्रिणा शिशिर-खनालेन सह उपवेशने डॉ.जयशंकरः अवदत् यत् उभयोः देशयोः सम्बन्धः जीवित-जन-सम्बन्धस्य, सीमापार-सम्पर्कस्य, पारस्परिक-सांस्कृतिक-धार्मिक-परम्पराणां च सुदृढाधारे विनिर्मितः अस्ति।

=========================

### अमितशाहः/सीमा

केन्द्रीय-गृहमन्त्री अमित-शाहः अन्ताराष्ट्रिय-सीमासु वित्तीय-व्यवहारस्य, भवन-निर्माणस्य सम्पत्ति-क्रय-विक्रयणस्य च विषये विशेष-समवधानतायै आहूतम्। एषः निर्देशः बी.एस्.एफ्.-सीमा-सुरक्षा-बलस्य त्रिपुरा-सीमा-मुख्यालये गृहमन्त्रिणः अध्यक्षतायाम् आकारिते

पूर्वोत्तरराज्य-सीमा-क्षेत्र-विषयके सम्मेलने प्रदत्तः। गृहमन्त्री विगत-पञ्च-वर्षाणां भूमि-लेखानां परीक्षणाय अपि निर्दिष्टवान्।

==========================

**केन्द्रीय-माध्यमिक-शिक्षा-परिषद्/अन्तिमतिथिः**

सी.बी.एस्.ई.-इति-केन्द्रीय-माध्यमिक-शिक्षा-परिषद् अङ्क-सत्यापनार्थं पुनर्मूल्याङ्कनार्थं च आवेदन-समर्पणाय अन्तिमां तिथिं जून-मासस्य सप्तम-दिनाङ्क-पर्यन्तम् अग्रेसारितवती। परिषदा उक्तं यत् विद्यार्थिनः अद्य मध्यरात्रिं यावत् स्वावेदनानि अर्पयितुम् अर्हन्ति। इतः पूर्वम्, आवेदन-समर्पणाय अन्तिमा तिथिः अस्य मासस्य षष्ठः दिनाङ्कः एव आसीत्।

==========================

**संस्कृत-साप्ताहिकी**

प्रिया: श्रोतार:, संस्कृत-जगता सम्बद्धै: विभिन्नै: क्रिया-कलापै: संवलितस्य संस्कृत-साप्ताहिकीति-विशिष्ट-कार्यक्रमस्य प्रसारणम् आकाशवाण्या: एफ्.एम्.गोल्ड्-प्रवाहिकात: अद्य मध्याह्ने सार्धैक-वादनत: भविष्यति। भवन्त: सर्वे यथाकालं श्रोतुं प्रभवन्ति।

==========================

**ऋतुः**

भारतीयर्तु-विभागेन अनुमितं यत् अद्य तटीय-कर्नाटक-माहे-केरलेषु मूसलाधार-वृष्टिः भविष्यति। पूर्वोत्तर-राज्यानाम् अधिकतर-भागेषु, आभ्यन्तरीण-कर्नाटके, गोवायाम्, तमिलनाडौ, पुद्दुचेर्याम् अण्डमान-निकोबार-द्वीप-समूहे च श्वः पर्यन्तं प्रबलवृष्टेः सम्भावना अस्ति।

==========================

**हॉकी**

जापाने, भारतस्य अन्तरष्टादश-वयोवर्गीय-पुरुष-दलेन एशिया-चषक-हॉकी-स्पर्धा-मालिका विजिता। निर्णायके द्वन्द्वे, भारतेन जापानं चत्वारि-एकम् इति अङ्कान्तरालेन पराजितम्। उपराष्ट्रपतिः सी.पी.राधाकृष्णन् प्रधानमन्त्री नरेन्द्र-मोदी च उत्तमप्रदर्शन-परकम् एतं विजयम् अभिलक्ष्य भारतीय-हॉकी-दलं वर्धापितवन्तौ।

==========================

## पादकन्दुक-स्पर्धा

गोवायां, भारतेन सैफ-महिला-पादकन्दुक-नायकस्पर्धा-शृङ्खला विजिता। निर्णायके द्वन्द्वे भारतेन बांग्लादेशः त्रीणि-शून्यम् इति अङ्कान्तरालेन पराजितः। ध्यानास्पदम् अस्ति यत् भारतेन षष्ठवारम् एषा शृङ्खला जिता।

==========================

## क्रिकेट्

नव-चण्डीगढे, भारताफगानिस्तानयोः एकमात्र-क्रिकेट्-निकष-स्पर्धायाः प्रथमदिनस्य क्रीडा-समाप्ति-पर्यन्तं ह्यः भारतेन क्रीडकत्रयस्य हानिपूर्वकम् अष्ट-षष्ट्यधिक-त्रिशतं धावनाङ्काः अर्जिताः। अद्य भारतम् इतः अग्रे क्रीडिष्यति। दलनायकः शुभमन-गिलः त्र्यधिक-शत-धावनाङ्कान् ऋषभ-पन्तः च पञ्चाशत्-धावनाङ्कान् अर्जित्वा सम्प्रति क्रीडायां वर्तमानौ स्तः।

।।इति वार्ता:।।